# Shri Shivasahasranamastotra from Vayupurana Adhyaya 30

# શ્રીશિવસહસ્રનામસ્તોત્રં વાયુપુરાણે અધ્યાય ૩૦

## Document Information

Text title : shivasahasranAmastotra vAyupurANe adhyAya 30

File name : shivasahasranAmastotravAyupurANa.itx

Category : sahasranAma, shiva, stotra, vAyupurANa

Location : doc_shiva

Transliterated by : Independently by Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : NA

Description-comments : vAyupurANa | adhyAya 30/180-319|| Also, brahmapurANa | adhyAya 40/2-100||

Latest update : March 3, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 20, 2024

*sanskritdocuments.org*

# શ્રીશિવસહસ્રનામસ્તોત્રં વાયુપુરાણે અધ્યાય ૩૦

દક્ષ ઉવાચ ।
ૐ નમસ્તે દેવદેવેશ દેવારિબલસૂદન ।
દેવેન્દ્ર હ્યમરશ્રેષ્ઠ દેવદાનવપૂજિત ॥ ૧૮૦॥

સહસ્રાક્ષ વિરૂપાક્ષ ત્ર્યક્ષ યક્ષાધિપપ્રિય ।
સર્વતઃ પાણિપાદસ્ત્વં સર્વતોઽક્ષિશિરોમુખઃ ।
સર્વતઃ શ્રુતિમાન્ લોકે સર્વાનાવૃત્ય તિષ્ઠસિ ॥ ૧૮૧॥

શઙ્કુકર્ણ મહાકર્ણ કુમ્ભકર્ણાર્ણવાલય ।
ગજેન્દ્રકર્ણ ગોકર્ણ પાણિકર્ણ નમોઽસ્તુ તે ॥ ૧૮૨॥

શતોદર શતાવર્ત્ત શતજિહ્વ શતાનન ।
ગાયન્તિ ત્વાં ગાયત્રિણો હ્યર્ચ્ચયન્તિ તથાર્ચ્ચિનઃ ॥ ૧૮૩॥

દેવદાનવગોપ્તા ચ બ્રહ્મા ચ ત્વં શતક્રતુઃ ।
મૂર્ત્તીશસ્ત્વં મહામૂર્તે સમુદ્રામ્બુ ધરાય ચ ॥ ૧૮૪॥

સર્વા હ્યસ્મિન્ દેવતાસ્તે ગાવો ગોષ્ઠ ઇવાસતે ।
શરીરન્તે પ્રપશ્યામિ સોમમગ્નિં જલેશ્વરમ્ ॥ ૧૮૫॥

આદિત્યમથ વિષ્ણુઞ્ચ બ્રહ્માણં સબૃહસ્પતિમ્ ।
ક્રિયા કાર્ય્યં કારણઞ્ચ કર્ત્તા કરણમેવ ચ ॥ ૧૮૬॥

અસચ્ચ સદસચ્ચૈવ તથૈવ પ્રભવાવ્યયમ્ ।
નમો ભવાય શર્વાય રુદ્રાય વરદાય ચ ॥ ૧૮૭॥

પશૂનાં પતયે ચૈવ નમસ્ત્વન્ધકઘાતિને ।
ત્રિજટાય ત્રિશીર્ષાય ત્રિશૂલવરધારિણે ॥ ૧૮૮॥

ત્ર્યમ્બકાય ત્રિનેત્રાય ત્રિપુરઘ્નાય વૈ નમઃ ।
નમશ્ચણ્ડાય મુણ્ડાય પ્રચણ્ડાય ધરાય ચ ॥ ૧૮૯॥

દણ્ડિ માસક્તકર્ણાય દણ્ડિમુણ્ડાય વૈ નમઃ ।
નમોઽર્ધ્વદણ્ડકેશાય નિષ્કાય વિકૃતાય ચ ॥ ૧૯૦॥

વિલોહિતાય ધૂમ્રાય નીલગ્રીવાય તે નમઃ ।
નમસ્ત્વપ્રતિરૂપાય શિવાય ચ નમોઽસ્તુ તે ॥ ૧૯૧॥

સૂર્યાય સૂર્યપતયે સૂર્યધ્વજપતાકિને ।
નમઃ પ્રમથનાથાય વૃષસ્કન્ધાય ધન્વિને ॥ ૧૯૨॥

નમો હિરણ્યગર્ભાય હિરણ્યકવચાય ચ ।
હિરણ્યકૃતચૂડાય હિરણ્યપતયે નમઃ ॥ ૧૯૩॥

સત્રઘાતાય દણ્ડાય વર્ણપાનપુટાય ચ ।
નમઃ સ્તુતાય સ્તુત્યાય સ્તૂયમાનાય વૈ નમઃ ॥ ૧૯૪॥

સર્વાયાભક્ષ્યભક્ષ્યાય સર્વભૂતાન્તરાત્મને ।
નમો હોત્રાય મન્ત્રાય શુક્લધ્વજપતાકિને ॥ ૧૯૫॥

નમો નમાય નમ્યાય નમઃ કિલિકિલાય ચ ।
નમસ્તે શયમાનાય શયિતાયોત્થિતાય ચ ॥ ૧૯૬॥

સ્થિતાય ચલમાનાય મુદ્રાય કુટિલાય ચ ।
નમો નર્ત્તનશીલાય મુખવાદિત્રકારિણે ॥ ૧૯૭॥

નાટ્યોપહારલુબ્ધાય ગીતવાદ્યરતાય ચ ।
નમો જ્યેષ્ઠાય શ્રેષ્ઠાય બલપ્રમથનાય ચ ॥ ૧૯૮॥

કલનાય ચ કલ્પાય ક્ષયાયોપક્ષયાય ચ ।
ભીમદુન્દુભિહાસાય ભીમસેનપ્રિયાય ચ ॥ ૧૯૯॥

ઉગ્રાય ચ નમો નિત્યં નમસ્તે દશબાહવે ।
નમઃ કપાલહસ્તાય ચિતાભસ્મપ્રિયાય ચ ॥ ૨૦૦॥

વિભીષણાય ભીષ્માય ભીષ્મવ્રતધરાય ચ ।
નમો વિકૃતવક્ષાય ખડ્ગજિહ્વાગ્રદંષ્ટ્રિણે ॥ ૨૦૧॥

પક્વામમાંસલુબ્ધાય તુમ્બવીણાપ્રિયાય ચ ।
નમો વૃષાય વૃષ્યાય વૃષ્ણયે વૃષણાય ચ ॥ ૨૦૨॥

કટઙ્કટાય ચણ્ડાય નમઃ સાવયવાય ચ ।
નમસ્તે વરકૃષ્ણાય વરાય વરદાય ચ ॥ ૨૦૩॥

વરગન્ધમાલ્યવસ્ત્રાય વરાતિવરયે નમઃ ।
નમો વર્ષાય વાતાય છાયાયૈ આતપાય ચ ॥ ૨૦૪॥

નમો રક્તવિરક્તાય શોભનાયાક્ષમાલિને ।
સમ્ભિન્નાય વિભિન્નાય વિવિક્તવિકટાય ચ ॥ ૨૦૫॥

અઘોરરૂપરૂપાય ઘોરઘોરતરાય ચ ।
નમઃ શિવાય શાન્તાય નમઃ શાન્તતરાય ચ ॥ ૨૦૬॥

એકપાદ્બહુનેત્રાય એકશીર્ષન્નમોઽસ્તુ તે ।
નમો વૃધ્દાય લુબ્ધાય સંવિભાગપ્રિયાય ચ ॥ ૨૦૭॥

પઞ્ચમાલાર્ચિતાઙ્ગાય નમઃ પાશુપતાય ચ ।
નમશ્ચણ્ડાય ઘણ્ટાય ઘણ્ટયા જગ્ઘરન્ધ્રિણે ॥ ૨૦૮॥

સહસ્રશતઘણ્ટાય ઘણ્ટામાલાપ્રિયાય ચ ।
પ્રાણદણ્ડાય ત્યાગાય નમો હિલિહિલાય ચ ॥ ૨૦૯॥

હૂંહૂઙ્કારાય પારાય હૂંહૂઙ્કારપ્રિયાય ચ ।
નમશ્ચ શમ્ભવે નિત્યં ગિરિ વૃક્ષકલાય ચ ॥ ૨૧૦॥

ગર્ભમાંસશ◌ૃગાલાય તારકાય તરાય ચ ।
નમો યજ્ઞાધિપતયે દ્રુતાયોપદ્રુતાય ચ ॥ ૨૧૧॥

યજ્ઞવાહાય દાનાય તપ્યાય તપનાય ચ ।
નમસ્તટાય ભવ્યાય તડિતાં પતયે નમઃ ॥ ૨૧૨॥

અન્નદાયાન્નપતયે નમોઽસ્ત્વન્નભવાય ચ ।
નમઃ સહસ્રશીર્ષ્ણે ચ સહસ્રચરણાય ચ ॥ ૨૧૩॥

સહસ્રોદ્યતશૂલાય સહસ્રનયનાય ચ ।
નમોઽસ્તુ બાલરૂપાય બાલરૂપધરાય ચ ॥ ૨૧૪॥

બાલાનાઞ્ચૈવ ગોપ્ત્રે ચ બાલક્રીડનકાય ચ ।
નમઃ શુધ્દાય બુધ્દાય ક્ષોભણાયાક્ષતાય ચ ॥ ૨૧૫॥

તરઙ્ગાઙ્કિતકેશાય મુક્તકેશાય વૈ નમઃ ।
નમઃ ષટ્કર્મનિષ્ઠાય ત્રિકર્મનિરતાય ચ ॥ ૨૧૬॥

વર્ણાશ્રમાણાં વિધિવત્ પૃથક્કર્મપ્રવર્તિને ।

નમો ઘોષાય ઘોષ્યાય નમઃ કલકલાય ચ ॥ ૨૧૭॥

શ્વેતપિઙ્ગલનેત્રાય કૃષ્ણરક્તાક્ષણાય ચ ।
ધર્માર્થ કામમોક્ષાય ક્રથાય કથનાય ચ ॥ ૨૧૮॥

સાઙ્ખ્યાય સાઙ્ખ્યમુખ્યાય યોગાધિપતયે નમઃ ।
નમો રથ્યવિરથ્યાય ચતુષ્પથરતાય ચ ॥ ૨૧૯॥

કૃષ્ણા જિનોત્તરીયાય વ્યાલયજ્ઞોપવીતિને ।
ઈશાનવજ્રસંહાય હરિકેશ નમોઽસ્તુ તે ।
અવિવેકૈકનાથાય વ્યક્તાવ્યક્ત નમોઽસ્તુ તે ॥ ૨૨૦॥

કામ કામદ કામઘ્ન ધૃષ્ટોદૃપ્તનિષૂદન ।
સર્વ સર્વદ સર્વજ્ઞ સન્ધ્યારાગ નમોઽસ્તુ તે ॥ ૨૨૧॥

મહાબાલ મહાબાહો મહાસત્ત્વ મહાદ્યુતે ।
મહામેઘવરપ્રેક્ષ મહાકાલ નમોઽસ્તુ તે ॥ ૨૨૨॥

સ્થૂલજીર્ણાઙ્ગજટિને વલ્કલાજિનધારિણે ।
દીપ્તસૂર્યાગ્નિજટિને વલ્કલાજિનવાસસે ।
સહસ્રસૂર્યપ્રતિમ તપોનિત્ય નમોઽસ્તુ તે ॥ ૨૨૩॥

ઉન્માદનશતાવર્ત્ત ગઙ્ગાતોયાર્દ્ધમૂર્દ્ધજ ।
ચન્દ્રાવર્ત્ત યુગાવર્ત્ત મેઘાવર્ત્ત નમોઽસ્તુ તે ॥ ૨૨૪॥

ત્વમન્નમન્નકર્ત્તા ચ અન્નદશ્ચ ત્વમેવ હિ ।
અન્નસ્રષ્ટા ચ પક્તા ચ પક્વભુક્તપચે નમઃ ॥ ૨૨૫॥

જરાયુજોઽણ્ડજશ્ચૈવ સ્વેદજોદ્ભિજ્જ એવ ચ ।
ત્વમેવ દેવદેવશો ભૂતગ્રામશ્ચતુર્વિધઃ ॥ ૨૨૬ ।
ચરાચરસ્ય બ્રહ્મા ત્વં પ્રતિહર્ત્તા ત્વમેવ ચ ।
ત્વમેવ બ્રહ્મવિદુષામપિ બ્રહ્મવિદાં વરઃ ॥ ૨૨૭॥

સત્ત્વસ્ય પરમા યોનિરબ્વાયુજ્યોતિષાં નિધિઃ ।
ઋક્સામાનિ તથોઙ્કારમાહુસ્ત્વાં બ્રહ્મવાદિનઃ ॥ ૨૨૮॥

હવિર્હાવી હવો હાવી હુવાં વાચાહુતિઃ સદા ।
ગાયન્તિ ત્વાં સુરશ્રેષ્ઠ સામગા બ્રહ્મવાદિનઃ ॥ ૨૨૯॥

યજુર્મયો ઋઙ્મયશ્ચ સામાથર્વમયસ્તથા ।

પઠ્યસે બ્રહ્મવિદ્ભિસ્ત્વં કલ્પોપનિષદાં ગણૈઃ ॥ ૨૩૦॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રા વર્ણાવરાશ્ચ યે ।
ત્વામેવ મેઘસઙ્ઘાશ્ચ વિશ્વસ્ત નિતગર્જિતમ્ ॥ ૨૩૧॥

સંવત્સરસ્ત્વમૃતવો માસા માસાર્દ્ધમેવ ચ ।
કલા કાષ્ઠા નિમેષાશ્ચ નક્ષત્રાણિ યુગા ગ્રહાઃ ॥ ૨૩૨॥

વૃષાણાં કકુદં ત્વં હિ ગિરીણાં શિખરાણિ ચ ।
સિંહો મૃગાણાં પતતાં તાર્ક્ષ્યોઽનન્તશ્ચ ભોગિનામ્ ॥ ૨૩૩॥

ક્ષીરોદો હ્યુદધીનાઞ્ચ યન્ત્રાણાં ધનુરેવ ચ ।
વજ્રમ્પ્રહરણાનાઞ્ચ વ્રતાનાં સત્યમેવ ચ ॥ ૨૩૪॥

ઇચ્છા દ્વેષશ્ચ રાગશ્ચ મોહઃ ક્ષામો દમઃ શમઃ ।
વ્યવસાયો ધૃતિર્લોભઃ કામક્રોધૌ જયાજયૌ ॥ ૨૩૫॥

ત્વં ગદી ત્વં શરી ચાપિ ખટ્વાઙ્ગી ઝર્ઝરી તથા ।
છેત્તા ભેત્તા પ્રહર્ત્તા ચ ત્વં નેતાપ્યન્તકો મતઃ ॥ ૨૩૬॥

દશલક્ષણસંયુક્તો ધર્મોઽર્થઃ કામ એવ ચ ।
ઇન્દ્રઃ સમુદ્રાઃ સરિતઃ પલ્વલાનિ સરાંસિ ચ ॥ ૨૩૭॥

લતાવલ્લી તૃણૌષધ્યઃ પશવો મૃગપક્ષિણઃ ।
દ્રવ્યકર્મગુણારમ્ભઃ કાલપુષ્પફલપ્રદઃ ॥ ૨૩૮॥

આદિશ્ચાન્તશ્ચ મધ્યશ્ચ ગાયત્ર્યોઙ્કાર એવ ચ ।
હરિતો લોહિતઃ કૃષ્ણો નીલઃ પીતસ્તથારુણઃ ॥ ૨૩૯॥

કદ્રુશ્ચ કપિલશ્ચૈવ કપોતો મેચકસ્તથા ।
સુવર્ણરેતા વિખ્યાતઃ સુવર્ણશ્ચાપ્યતો મતઃ ॥ ૨૪૦॥

સુવર્ણનામા ચ તથા સુવર્ણપ્રિય એવ ચ ।
ત્વમિન્દ્રોઽથ યમશ્ચૈવ વરુણો ધનદોઽનલઃ ॥ ૨૪૧॥

ઉત્ફુલ્લશ્ચિત્રભાનુશ્ચ સ્વર્ભાનુર્ભાનુરેવ ચ ।
હોત્રં હોતા ચ હોમસ્ત્વં હુતઞ્ચ પ્રહુતં પ્રભુઃ ॥ ૨૪૨॥

સુપર્ણઞ્ચ તથા બ્રહ્મ યજુષાં શતરુદ્રિયમ્ ।
પવિત્રાણાં પવિત્રં ચ મઙ્ગલાનાઞ્ચ મઙ્ગલમ્ ॥ ૨૪૩॥

ગિરિઃ સ્તોકસ્તથા વૃક્ષો જીવઃ પુદ્ગલ એવ ચ ।
સત્ત્વં ત્વઞ્ચ રજસ્ત્વઞ્ચ તમશ્ચ પ્રજનં તથા ॥ ૨૪૪॥

પ્રાણોઽપાનઃ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।
ઉન્મેષશ્ચૈવ મેષશ્ચ તથા જૃમ્ભિતમેવ ચ ॥ ૨૪૫॥

લોહિતાઙ્ગો ગદી દંષ્ટ્રી મહાવક્ત્રો મહોદરઃ ।
શુચિરોમા હરિચ્છ્મશ્રુરૂર્દ્ધ્વકેશસ્ત્રિલોચનઃ ॥ ૨૪૬॥

ગીતવાદિત્રનૃત્યાઙ્ગો ગીતવાદનકપ્રિયઃ ।
મત્સ્યો જલી જલો જલ્યો જવઃ કાલઃ કલી કલઃ ॥ ૨૪૭॥

વિકાલશ્ચ સુકાલશ્ચ દુષ્કાલઃ કલનાશનઃ ।
મૃત્યુશ્ચૈવ ક્ષયોઽન્તશ્ચ ક્ષમાપાયકરો હરઃ ॥ ૨૪૮॥

સંવર્ત્તકોઽન્તકશ્ચૈવ સંવર્ત્તકબલાહકૌ ।
ઘટો ઘટીકો ઘણ્ટીકો ચૂડાલોલબલો બલમ્ ॥ ૨૪૯॥

બ્રહ્મકાલોઽગ્નિવક્ત્રશ્ચ દણ્ડી મુણ્ડી ચ દણ્ડધૃક્ ।
ચતુર્યુગશ્ચતુર્વેદશ્ચતુર્હોત્રશ્ચતુષ્પથઃ ॥ ૨૫૦॥

ચતુરા શ્રમવેત્તા ચ ચાતુર્વર્ણ્યકરશ્ચ હ ।
ક્ષરાક્ષરપ્રિયો ધૂર્ત્તોઽગણ્યોઽગણ્યગણાધિપઃ ॥ ૨૫૧॥

રુદ્રાક્ષમાલ્યામ્બરધરો ગિરિકો ગિરિકપ્રિયઃ ।
શિલ્પીશઃ શિલ્પિનાં શ્રેષ્ઠઃ સર્વશિલ્પપ્રવર્ત્તકઃ ॥ ૨૫૨॥

ભગનેત્રાન્તકશ્ચન્દ્રઃ પૂષ્ણો દન્તવિનાશનઃ ।
ગૂઢાવર્ત્તશ્ચ ગૂઢશ્ચ ગૂઢપ્રતિનિષેવિતા ॥ ૨૫૩॥

તરણસ્તારકશ્ચૈવ સર્વભૂતસુતારણઃ ।
ધાતા વિધાતા સત્વાનાં નિધાતા ધારણો ધરઃ ॥ ૨૫૪॥

તપો બ્રહ્મ ચ સત્યઞ્ચ બ્રહ્મચર્યમથાર્જવમ્ ।
ભૂતાત્મા ભૂતકૃદ્ભૂતો ભૂતભવ્યભવોદ્ભવઃ ॥ ૨૫૫॥

ભૂર્ભુવઃસ્વરિતશ્ચૈવ તથોત્પત્તિર્મહેશ્વરઃ ।
ઈશાનો વીક્ષણઃ શાન્તો દુર્દાન્તો દન્તનાશનઃ ॥ ૨૫૬॥

બ્રહ્માવર્ત્ત સુરાવર્ત્ત કામાવર્ત્ત નમોઽસ્તુ તે ।
કામબિમ્બનિહર્ત્તા ચ કર્ણિકારરજઃપ્રિયઃ ॥ ૨૫૭॥

મુખચન્દ્રો ભીમમુખઃ સુમુખો દુર્મુખો મુખઃ ।
ચતુર્મુખો બહુમુખો રણે હ્યભિમુખઃ સદા ॥ ૨૫૮॥

હિરણ્યગર્ભઃ શકુનિર્મહોદધિઃ પરો વિરાટ્ ।
અધર્મહા મહાદણ્ડો દણ્ડધારી રણપ્રિયઃ ॥ ૨૫૯॥

ગોતમો ગોપ્રતારશ્ચ ગોવૃષેશ્વરવાહનઃ ।
ધર્મકૃદ્ધર્મસ્રષ્ટા ચ ધર્મો ધર્મવિદુત્તમઃ ॥ ૨૬૦॥

ત્રૈલોક્યગોપ્તા ગોવિન્દો માનદો માન એવ ચ ।
તિષ્ઠન્ સ્થિરશ્ચ સ્થાણુશ્ચ નિષ્કમ્પઃ કમ્પ એવ ચ ॥ ૨૬૧॥

દુર્વારણો દુર્વિષદો દુઃસહો દુરતિક્રમઃ ।
દુર્દ્ધરો દુષ્પ્રકમ્પશ્ચ દુર્વિદો દુર્જયો જયઃ ॥ ૨૬૨॥

શશઃ શશાઙ્કઃ શમનઃ શીતોષ્ણં દુર્જરાઽથ તૃટ્ ।
આધયો વ્યાધયશ્ચૈવ વ્યાધિહા વ્યાધિગશ્ચ હ ॥ ૨૬૩॥

સહ્યો યજ્ઞો મૃગા વ્યાધા વ્યાધીનામાકરોઽકરઃ ।
શિખણ્ડી પુણ્ડરીકાક્ષઃ પુણ્ડરીકાવલોકનઃ ॥ ૨૬૪॥

દણ્ડધરઃ સદણ્ડશ્ચ દણ્ડમુણ્ડવિભૂષિતઃ ।
વિષપોઽમૃતપશ્ચૈવ સુરાપઃ ક્ષીરસોમપઃ ॥ ૨૬૫॥

મધુપશ્ચાજ્યપશ્ચૈવ સર્વપશ્ચ મહાબલઃ ।
વૃષાશ્વવાહ્યો વૃષભસ્તથા વૃષભલોચનઃ ॥ ૨૬૬॥

વૃષભશ્ચૈવ વિખ્યાતો લોકાનાં લોકસત્કૃતઃ ।
ચન્દ્રાદિત્યૌ ચક્ષુષી તે હૃદયઞ્ચ પિતામહઃ ।
અગ્નિરાપસ્તથા દેવો ધર્મકર્મપ્રસાધિતઃ ॥ ૨૬૭॥

ન બ્રહ્મા ન ચ ગોવિન્દઃ પુરાણઋષયો ન ચ ।
માહાત્મ્યં વેદિતું શક્તા યાથાતથ્યેન તે શિવ ॥ ૨૬૮॥

યા મૂર્ત્તયઃ સુસૂક્ષ્માસ્તે ન મહ્યં યાન્તિ દર્શનમ્ ।
તાભિર્માં સતતં રક્ષ પિતા પુત્રમિવૌરસમ્ ॥ ૨૬૯॥

રક્ષ માં રક્ષણીયોઽહં તવાનઘ નમોઽસ્તુ તે ॥

ભક્તાનુકમ્પી ભગવાન્ ભક્તશ્ચાહં સદા ત્વયિ ॥ ૨૭૦॥

યઃ સહસ્રાણ્યનેકાનિ પુંસામાહૃત્ય દુર્દૃશઃ ।
તિષ્ઠત્યેકઃ સમુદ્રાન્તે સ મે ગોપ્તાસ્તુ નિત્યશઃ ॥ ૨૭૧॥

યં વિનિદ્રા જિતશ્વાસાઃ સત્ત્વસ્થાઃ સમદર્શિનઃ ।
જ્યોતિઃ પશ્યન્તિ યુઞ્જાનાસ્તસ્મૈ યોગાત્મને નમઃ ॥ ૨૭૨॥

સમ્ભક્ષ્ય સર્વ ભૂતાનિ યુગાન્તે સમુપસ્થિતે ।
યઃ શેતે જલમધ્યસ્થસ્તં પ્રપદ્યેઽપ્સુશાયિનમ્ ॥ ૨૭૩॥

પ્રવિશ્ય વદને રાહોર્યઃ સોમં ગ્રસતે નિશિ ।
ગ્રસત્યર્કઞ્ચ સ્વર્ભાનુર્ભૂત્વા સોમાગ્નિરેવ ચ ॥ ૨૭૪॥

યેઽઙ્ગુષ્ઠમાત્રાઃ પુરુષા દેહસ્થાઃ સર્વદેહિનામ્ ।
રક્ષન્તુ તે હિ માં નિત્યં નિત્યમાપ્યાયયન્તુ મામ્ ॥ ૨૭૫॥

યે ચાપ્યુત્પતિતા ગર્ભાદધોભાગગતાશ્ચ યે ।
તેષાં સ્વાહાઃ સ્વધાશ્ચૈવ આપ્નુવન્તુ સ્વદન્તુ ચ ॥ ૨૭૬॥

યે ન રોદન્તિ દેહસ્થાઃ પ્રાણિનો રોદયન્તિ ચ ।
હર્ષયન્તિ ચ હૃષ્યન્તિ નમસ્તેભ્યોઽસ્તુ નિત્યશઃ ॥ ૨૭૭॥

યે સમુદ્રે નદીદુર્ગે પર્વતેષુ ગુહાસુ ચ ।
વૃક્ષમૂલેષુ ગોષ્ઠેષુ કાન્તારગહનેષુ ન ॥ ૨૭૮॥

ચતુષ્પથેષુ રથ્યાસુ ચત્વરેષુ સભાસુ ચ ।
ચન્દ્રાર્કયોર્મધ્યગતા યે ચ ચન્દ્રાર્કરશ્મિષુ ॥ ૨૭૯॥

રસાતલગતા યે ચ યે ચ તસ્માત્પરઙ્ગતાઃ ।
નમસ્તેભ્યો નમસ્તેભ્યો નમસ્તેભ્યશ્ચ નિત્યશઃ ।
સૂક્ષ્માઃ સ્થૂલાઃ કૃશા હ્રસ્વા નમસ્તેભ્યસ્તુ નિત્યશઃ ॥ ૨૮૦॥

સર્વસ્ત્વં સર્વગો દેવ સર્વભૂતપતિર્ભવાન્ ।
સર્વભૂતાન્તરાત્મા ચ તેન ત્વં ન નિમન્ત્રિતઃ ॥ ૨૮૧॥

ત્વમેવ ચેજ્યસે યસ્માદ્યજ્ઞૈર્વિવિધદક્ષિણૈઃ ।
ત્વમેવ કર્ત્તા સર્વસ્ય તેન ત્વં ન નિમન્ત્રિતઃ ॥ ૨૮૨॥

અથવા માયયા દેવ મોહિતઃ સૂક્ષ્મયા ત્વયા ।
એતસ્માત્ કારણાદ્વાપિ તેન ત્વં ન નિમન્ત્રિતઃ ॥ ૨૮૩॥

પ્રસીદ મમ દેવેશ ત્વમેવ શરણં મમ ।
ત્વં ગતિસ્ત્વં પ્રતિષ્ઠા ચ ન ચાન્યાસ્તિ ન મે ગતિઃ ॥ ૨૮૪॥

સ્તુત્વૈવં સ મહાદેવં વિરરામ પ્રજાપતિઃ ।
ભગવાનપિ સુપ્રીતઃ પુનર્દક્ષમભાષત ॥ ૨૮૫॥

પરિતુષ્ટોઽસ્મિ તે દક્ષ સ્તવેનાનેન સુવ્રત ।
બહુનાત્ર કિમુક્તેન મત્સમીપં ગમિષ્યસિ ॥ ૨૮૬॥

અથૈનમબ્રવીદ્વાક્યં ત્રૈલોક્યાધિપતિર્ભવઃ ।
કૃત્વાશ્વાસકરં વાક્યં વાક્યજ્ઞો વાક્યમાહતમ્ ॥ ૨૮૭॥

દક્ષ દક્ષ ન કર્ત્તવ્યો મન્યુર્વિઘ્નમિમં પ્રતિ ।
અહં યજ્ઞહા ન ત્વન્યો દૃશ્યતે તત્પુરા ત્વયા ॥ ૨૮૮॥

ભૂયશ્ચ તં વરમિમં મત્તો ગૃહ્ણીષ્વ સુવ્રત ।
પ્રસન્નવદનો ભૂત્વા ત્વમેકાગ્રમનાઃ શૃણુ ॥ ૨૮૯॥

અશ્વમેધસહસ્રસ્ય વાજપેયશતસ્ય ચ ।
પ્રજાપતે મત્પ્રસાદાત્ ફલભાગી ભવિષ્યસિ ॥ ૨૯૦॥

વેદાન્ ષડઙ્ગાનુદ્ધૃત્ય સાઙ્ખ્યાન્યોગાંશ્ચ કૃત્સ્નશઃ ।
તપશ્ચ વિપુલં તપ્ત્વા દુશ્ચરં દેવદાનવૈઃ ॥ ૨૯૧॥

અર્થૈર્દ્દશાર્દ્ધસંયુક્તૈર્ગૂઢમપ્રાજ્ઞનિર્મ્મિતમ્ ।
વર્ણાશ્રમકૃતૈર્ધર્મૈર્વિપરીતં ક્વચિત્સમમ્ ॥ ૨૯૨॥

શ્રુત્યર્થૈરધ્યવસિતં પશુપાશવિમોક્ષણમ્ ।
સર્વેષામાશ્રમાણાન્તુ મયા પાશુપતં વ્રતમ્ ।
ઉત્પાદિતં શુભં દક્ષ સર્વપાપવિમોક્ષણમ્ ॥ ૨૯૩॥

અસ્ય ચીર્ણસ્ય યત્સમ્યક્ ફલં ભવતિ પુષ્કલમ્ ।
તદસ્તુ તે મહાભાગ માનસસ્ત્યજ્યતાં જ્વરઃ ॥ ૨૯૪॥

એવમુક્ત્વા મહાદેવઃ સપત્નીકઃ સહાનુગઃ ।
અદર્શનમનુપ્રાપ્તો દક્ષસ્યામિતવિક્રમઃ ॥ ૨૯૫॥

અવાપ્ય ચ તદા ભાગં યથોક્તં બ્રહ્મણા ભવઃ ।
જ્વરઞ્ચ સર્વધર્મજ્ઞો બહુધા વ્યભજત્તદા ।
શાન્ત્યર્થં સર્વભૂતાનાં શૃણુધ્વં તત્ર વૈ દ્વિજાઃ ॥ ૨૯૬॥

શીર્ષાભિતાપો નાગાનાં પર્વતાનાં શિલારુજઃ ।
અપાન્તુ નાલિકાં વિદ્યાન્નિર્મોકમ્ભુજગેષ્વપિ ॥ ૨૯૭॥

સ્વૌરકઃ સૌરભેયાણામૂષરઃ પૃથિવીતલે ।
ઇભા નામપિ ધર્મજ્ઞ દૃષ્ટિપ્રત્યવરોધનમ્ ॥ ૨૯૮॥

રન્ધ્રોદ્ભૂતં તથાશ્વાનાં શિખોદ્ભેદશ્ચ બર્હિણામ્ ।
નેત્રરોગઃ કોકિલાનાં જ્વરઃ પ્રોક્તો મહાત્મભિઃ ॥ ૨૯૯॥

અજાનાં પિત્તભેદશ્ચ સર્વેષામિતિ નઃ શ્રુતમ્ ।
શુકાનામપિ સર્વેષાં હિમિકા પ્રોચ્યતે જ્વરઃ ।
શાર્દૂલેષ્વપિ વૈ વિપ્રાઃ શ્રમો જ્વર ઇહોચ્યતે ॥ ૩૦૦॥

માનુષેષુ તુ સર્વજ્ઞ જ્વરો નામૈષ કીર્તિતઃ ।
મરણે જન્મનિ તથા મધ્યે ચ વિશતે સદા ॥ ૩૦૧॥

એતન્માહેશ્વરં તેજો જ્વરો નામ સુદારુણઃ ।
નમસ્યશ્ચૈવ માન્યશ્ચ સર્વપ્રાણિભિરીશ્વરઃ ॥ ૩૦૨॥

ઇમાં જ્વરોત્પત્તિમદીનમાનસઃ પઠેત્સદા યઃ સુસમાહિતો નરઃ ।
વિમુક્તરોગઃ સ નરો મુદા યુતો લભેત કામાન્ સ યથામનીષિતાન્ ॥ ૩૦૩॥

દક્ષપ્રોક્તં સ્તવઞ્ચાપિ કીર્તયેદ્યઃ શૃણોતિ વા ।
નાશુભં પ્રાપ્નુયાત્ કિઞ્ચિદ્દીર્ઘઞ્ચાયુરવાપ્નુયાત્ ॥ ૩૦૪॥

યથા સર્વેષુ દેવેષુ વરિષ્ઠો યોગવાન્ હરઃ ।
તથા સ્તવો વરિષ્ઠોઽયં સ્તવાનાં બ્રહ્મનિર્મિતઃ ॥ ૩૦૫॥

યશોરાજ્યસુખૈશ્વર્યવિત્તાયુર્ધનકાઙ્ક્ષિભિઃ ।
સ્તોતવ્યો ભક્તિમાસ્થાય વિદ્યાકામૈશ્ચ યત્નતઃ ॥ ૩૦૬॥

વ્યાધિતો દુઃખિતો દીનશ્ચૌરત્રસ્તો ભયાર્દિતઃ ।
રાજકાર્યનિયુક્તો વા મુચ્યતે મહતો ભયાત્ ॥ ૩૦૭॥

અનેન ચૈવ દેહેન ગણાનાં સ ગણાધિપઃ ।
ઇહ લોકે સુખં પ્રાપ્ય ગણ એવોપપદ્યતે ॥ ૩૦૮॥

ન ચ યક્ષાઃ પિશાચા વા ન નાગા ન વિનાયકાઃ ।
કુર્યુર્વિઘ્નં ગૃહે તસ્ય યત્ર સંસ્તૂયતે ભવઃ ॥ ૩૦૯॥

શૃણુયાદ્વા ઇદં નારી સુભક્ત્યા બ્રહ્મચારિણી ।

પિતૃભિર્ભર્તૃપક્ષાભ્યાં પૂજ્યા ભવતિ દેવવત્ ॥ ૩૧૦॥

શ઼ૃણુયાદ્વા ઇદં સર્વં કીર્ત્તયેદ્વાપ્યભીક્ષ્ણશઃ ।
તસ્ય સર્વાણિ કાર્યાણિ સિદ્ધિં ગચ્છન્ત્યવિઘ્નતઃ ॥ ૩૧૧॥

મનસા ચિન્તિતં યચ્ચ યચ્ચ વાચાપ્યુદાહૃતમ્ ।
સર્વં સમ્પદ્યતે તસ્ય સ્તવનસ્યાનુકીર્ત્તનાત્ ॥ ૩૧૨॥

દેવસ્ય સગુહસ્યાથ દેવ્યા નન્દીશ્વરસ્ય તુ ।
બલિં વિભવતઃ કૃત્વા દમેન નિયમેન ચ ॥ ૩૧૩॥

તતઃ સ યુક્તો ગૃહ્ણીયાન્નામાન્યાશુ યથાક્રમમ્ ।
ઈપ્સિતાન્ લભતેઽત્યર્થં કામાન્ ભોગાંશ્ચ માનવઃ ।
મૃતશ્ચ સ્વર્ગમાપ્નોતિ સ્ત્રીસહસ્રપરિવૃતઃ ॥ ૩૧૪॥

સર્વ કર્મસુ યુક્તો વા યુક્તો વા સર્વપાતકૈઃ ।
પઠન્ દક્ષકૃતં સ્તોત્રં સર્વપાપૈઃ પ્રમુચ્યતે ।
મૃતશ્ચ ગણસાલોક્યં પૂજ્યમાનઃ સુરાસુરૈઃ ॥ ૩૧૫॥

વૃષેવ વિધિયુક્તેન વિમાનેન વિરાજતે ।
આભૂતસમ્પ્લવસ્થાયી રુદ્રસ્યાનુચરો ભવેત્ ॥ ૩૧૬॥

ઇત્યાહ ભગવાન્ વ્યાસઃ પરાશરસુતઃ પ્રભુઃ ।
નૈતદ્વેદયતે કશ્ચિન્નેદં શ્રાવ્યન્તુ કસ્યચિત્ ॥ ૩૧૭॥

શ્રુત્વૈતત્પરમં ગુહ્યં યેઽપિ સ્યુઃ પાપકારિણઃ ।
વૈશ્યાઃ સ્ત્રિયશ્ચ શૂદ્રાશ્ચ રુદ્રલોકમવાપ્નુયુઃ ॥ ૩૧૮॥

શ્રાવયેદ્યસ્તુ વિપ્રેભ્યઃ સદા પર્વસુ પર્વસુ ।
રુદ્રલોકમવાપ્નોતિ દ્વિજો વૈ નાત્ર સંશયઃ ॥ ૩૧૯॥

ઇતિ શ્રીવાયુમહાપુરાણે વાયુપ્રોક્તે દક્ષશાપવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૩૦॥

વાયુપુરાણ । અધ્યાય ૩૦/૧૮૦-૩૧૯॥

vAyupurANa . adhyAya 30/180-319..

Eન્ચોદેદ્ બ્ય્ ષિવકુમર્ ઠ્યગરજન્ શિવકુમર્૨૪ અત્ ગ્મૈલ્ૅઓમ્
આલ્સો અવૈલબ્લે અત્ હ્ત્ત્પ્://સ।વિકિસોઉર્ચે।ઓર્ગ્ Vઅયુપુરન આધ્યય ૩૦
સ્તર્તિન્ગ્ અત્ વેર્સે ૧૮૦। ઠિસ્ શિવસહસ્રનામ સ્તોત્ર ઇસ્ રેફ઼ેરેન્ચેદ્

ઇન્ Pઉરન ઈન્દેક્ષ્ ફ઼ોર્ સહસ્રનામસ્તોત્ર।

ર઼ેફ઼ેર્ અલ્સો તો
brahmapurANa . adhyAya 40/2-100..

બ્રહ્મપુરાણ । અધ્યાય ૪૦/૨-૧૦૦॥

Pરૂફ઼્રેઅદ્ ણા।

---

*Shri Shivasahasranamastotra from Vayupurana Adhyaya 30*
pdf was typeset on September 20, 2024

Please send corrections to *sanskrit@cheerful.com*